# आदर्शपाठयोजना (2023-24)
# (संस्कृत-अपठितगद्यांशशिक्षणम्)

| | | |
|---|---|---|
| **विषयः - संस्कृतम्** | **कालांशः - तृतीयः** | **कक्षा - 9-12** |
| **प्रकरणम् - "अपठितगद्यांशः"** | **अवधिः - 40 निमेषाः** | **दिनाङ्कः - 28.03.23** |

## 1. अधिगमस्य प्रतिफलानि –

i. छात्रेषु संस्कृतगद्यं प्रति रुच्युत्पादनम्।
ii. छात्रेषु कोमलभावानां विकासकरणम्।
iii. छात्रेषु संस्कृतगद्यांशस्य अर्थग्रहणक्षमतायाः विकासकरणम्।
iv. छात्रेषु श्रवणस्य भाषणस्य पठनस्य लेखनस्य चेतेषां चतुर्णां भाषिककौशलानां विकासकरणम्।
v. छात्राणां शब्दभण्डारस्य अभिवर्द्धनम्।
vi. छात्रेषु लिपिज्ञानवर्द्धनम्।
vii. छात्रेषु गद्यगतभावानाम् अवबोधनक्षमतायाः विकासकरणम्।

## 2. अनुदेशात्मकानि उद्देश्यानि –

छात्राः अपठितगद्यांशं पठित्वा गद्यांशस्य अर्थम् अवगन्तुं प्रश्नानाम् उत्तराणि दातुं च समर्थाः भविष्यन्ति।

**ज्ञानात्मकपक्षः –**

i. भाषासम्बन्धी ज्ञानग्रहणम्।
ii. गद्यांशस्य मूलभावानाम् अवगमनम्।
iii. छात्राः संस्कृतभाषायाम् उत्तरप्रदानं कर्तुं समर्थाः भविष्यन्ति।
iv. गद्यांशाधारितानि भाषातत्त्वानि स्मरणे समर्थाः भविष्यन्ति।
v. छात्राः गद्यांशस्य शब्दानां शुद्धोच्चारणं कर्तुं शक्ष्यन्ति।

**बोधात्मकपक्षः –**

i. भाषासम्बन्धी तत्त्वानां ज्ञानग्रहणम्।
ii. वर्तन्याः शुद्धशब्दानाञ्च बोधकरणम्।
iii. छात्राः गद्यांशस्य आदर्शवाचनं श्रुत्वा गद्यस्य मुख्यभागान् अवगमिष्यन्ति।
iv. छात्राः गद्यांशं ध्यानपूर्वकं पठने समर्थाः भविष्यन्ति।
v. छात्राः गद्यांशस्य तुलनाम् अन्यैः गद्यांशैः सह कर्तुं शक्ष्यन्ति।

**कौशलात्मकपक्षः –**

i. कौशलानां निर्माणकरणम्।

ii. गद्याशं पठित्वा अन्यगद्यांशानाम् उत्तराणि दातुं समर्थाः भवन्ति।

**अभिरुच्यात्मकपक्षः –**

i. विषयस्य मूलभावं प्रति रुचेः उत्पत्तिकरणम्।
ii. गद्यांशानां पठने रुचेः उत्पत्तिं कर्तुं शक्ष्यन्ति।
iii. गद्यांशं ज्ञातुं रुचेः उत्पत्तिकरणम्।

**अभिवृत्यात्मक पक्षः –**

i. छात्राः विषयं प्रति सकारात्मकं भावं स्थापयन्ति।
ii. छात्राः विषयसम्बन्धिनां नूतनशब्दानां ज्ञानग्रहणं करिष्यन्ति।
iii. छात्राणां मानसिकस्तरम् उन्नतं भविष्यति।

## 3. शिक्षणविधयः -

व्याख्यानविधिः — अर्थकथनविधिः
प्रश्नोत्तरविधिः — मूल्याङ्कनविधिः

## 4. शिक्षणाधिगमसामग्री -

शयामपट्टः — सुधाखण्डः — मार्जनी
पाठ्यपुस्तकम् — सङ्केतकः

## 5. पूर्वज्ञानानुमानम् -

छात्राः **'अपठितगधांशम्'** इत्यस्मिन् विषये पूर्वमेव किञ्चित् जानन्ति एव।

## 6. पूर्वज्ञानपरीक्षणम् -

| अध्यापकस्य क्रियाः | छात्राणां क्रियाः |
|---|---|
| 1. संस्कृत साहित्यस्य काः - काः विधाः सन्ति?<br>2. भवन्तः अद्य पर्यन्तं कमपि गद्यांशं पठितवन्तः किम्?<br>3. अपठितगद्यांशस्य प्रश्नानां उत्तराणि केन प्रकारेण चिन्वन्ति? | गद्यं पद्यं मुक्तकञ्च<br>आम्<br>छात्राः निरुत्तराः (समस्यात्मकः प्रश्नः) |

## 7. उद्देश्यकथनम् -

अद्य वयम् **"अपठितगद्यांशात्"** प्रश्नानाम् उत्तराणि कथं चिनुमः इति ज्ञास्यामः।

## 8. नियमीकरणम् –

पाठ्यक्रमेण सह यस्य सम्बन्धः नास्ति तस्य नाम अपठितगद्यांशः भवति। अपठितगद्यांशस्य कोऽपि विषयः निश्चितः नास्ति। कला विज्ञानं साहित्यं राजनीतिकम् अर्थशास्त्रं च यस्मात् कस्मादपि विषयाद् अपठितगद्यांशो भवितुमर्हति।

## 9. प्रस्तुतीकरणम् -

| अध्यापकस्य क्रियाः | छात्राणां क्रियाः | श्यामपट्टकार्यम् | मूल्याङ्कनम् |
|---|---|---|---|
| **अपठितगद्यांशस्य सरलीकरणे ध्यातव्याः बिन्दवः –**<br><br>1. अपठितगद्यांशस्य मूकवाचनं कृत्वा गद्यांशस्य अवगमनस्य प्रयासः करणीयः। | छात्राः ध्यानपूर्वकं श्रोष्यन्ति। | | येषां प्रश्नानामुत्तराणि स्पष्टानि न स्युः तेषां कृते अस्माभिः स्पष्टता कर्तव्या। |
| 2. प्रश्नानां पठनानन्तरं गद्यांशस्य सम्भावितानि उत्तराणि रेखाङ्कितानि कुर्यात्।<br>3. येषां प्रश्नानामुत्तराणि स्पष्टानि न स्युः तेषां कृते पुनः गद्यांशं पठित्वा उत्तराणि चिनुयात्। | छात्राः ध्यानपूर्वकं श्रोष्यन्ति। | | |
| 4 प्रश्नानामुत्तराणि स्पष्टानि स्युः।<br>5 शीर्षकविषयकः प्रश्नः गद्यांशस्य मूलभावेन सह सम्बद्धः स्यात्।<br>6 शीर्षकः सम्पूर्णगद्यांशस्य अभिव्यक्तिमूलकः स्यात्।<br><br>अन्ते प्रश्नानामुत्तराणि एकवारं पुनः पठित्वा तेषां मध्ये आगतानां त्रुटीनां निराकरणं कुर्यात्। | छात्राः ध्यानपूर्वकं श्रोष्यन्ति। | | |
| **विधयः विशेषताश्च -**<br><br>1. प्रस्तुतम् अपठितगद्यांशं मनसि एव एकवारं द्विवारं वा पठनीयम् ।<br>2. अपठितगद्यांशस्य पुनः पठनसमये विशिष्टानि स्थलानि रेखाङ्कितानि कर्तव्यानि।<br>3. अपठितगद्यांशस्य उत्तराणां प्रदानसमये अनुचितानां शब्दानां प्रयोगः न करणीयः। | छात्राः ध्यानपूर्वकं श्रोष्यन्ति। | | |
| 4. अपठितगद्यांशस्य प्रश्नाः यस्मिन् वचने यस्मिन् लिङ्गे यस्यां विभक्तौ च पृष्टाः तेषां प्रश्नानाम् उत्तराणि तदनुसारमेव दातव्यानि। | छात्राः ध्यानपूर्वकं श्रोष्यन्ति। | | |
| एकमुद्देश्यं लक्ष्यीकृत्य बहूनां जनानाम् ऐक्यभावनया कार्यकरणमेव संहतिः संगठनं वाभिधीयते। एकता मनुष्ये शक्तिमादधाति। एकतयैव देशः समाजो | अध्यापकस्य निर्देशानुसारं छात्राः | | |

| | | | |
|---|---|---|---|
| लोकश्च उन्नतिपथं प्राप्नुवन्ति। यस्मिन् देशे समाजे वा एकताऽस्ति, स एव देशः सकललोकाय सम्माननीयो भवति।<br><br>संसारे एकतायाः अतीवावश्यकता वर्तते। विशेषतः कलियुगेऽस्मिन् संहतिः कार्यसाधिका। यतो हि वर्तमानकाले यादृशं सामाजिकं राष्ट्रियं च जीवनमस्ति, तस्य निर्माणाय रक्षणाय च संगठनं परमावश्यकम्। अद्यत्वे संसारे यस्मिन् राष्ट्र एकतायाः अभावोऽस्ति, तद् राष्ट्रं सद्य एव परतन्त्रतापाशबद्धं भवति। अस्माकं देशस्य पारतन्त्र्यम् अनया एव एकतया सहयोगेन वा विच्छिन्नं जातम्। महात्मना गान्धिमहोदयेन तथैवान्यैश्च देशभक्तैः भारतीयसमाजे सर्वत्र एकत्वभावनोदयेन पराधीनतापाशस्य छेदनं विहितम्। अधुना लोकतन्त्रात्मकमस्माकं राष्ट्रं संघटनबलेनैव स्वोन्नतिं विदधाति।<br><br>**एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br><br>**प्रश्न 1.**<br>(i) एकता मनुष्ये किम् आदधाति?<br>(ii) संसारे कस्याः अतीव आवश्यकता वर्तते?<br>(iii) एकतया अस्माकं देशस्य किं विच्छिन्नं जातम्?<br><br>**पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br><br>**प्रश्न 2.**<br>(i) राष्ट्रस्य निर्माणाय रक्षणाय च किं परमावश्यकम्?<br><br>(ii) अस्माकं देशस्य पारतन्त्र्यं केन विच्छिन्नं जातम्?<br><br>(iii) कीदृशः देशः सकललोकाय सम्माननीयो भवति? | गद्यांशस्य वाचनं करिष्यन्ति। | **उत्तराणि –**<br>(i) शक्तिम्।<br>(ii) एकतायाः।<br>(iii) पारतन्त्र्यम्।<br><br>(i) राष्ट्रस्य निर्माणाय रक्षणाय च संघटनं परमावश्यकम्।<br><br>(ii) अस्माकं देशस्य पारतन्त्र्यम् एकतया सहयोगेन वा विच्छिन्नं जातम्।<br>(iii) यस्मिन् देशे एकताऽस्ति, सः देशः सकललोकाय सम्माननीयो भवति। | |

| | | | |
|---|---|---|---|
| **प्रश्न 3.**<br>अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।<br><br>**निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नत्रयम्)**<br><br>**प्रश्न 1.**<br>'**आदधाति**' इत्यस्य क्रियापदस्य कर्तृपदं किमस्ति?<br>(क) देशः<br>(ख) एकता<br>(ग) संहतिः<br>(घ) संघटनम्<br><br>**प्रश्न 2.**<br>'**बहूनाम्**' इत्यस्य विशेषणस्य गद्यांशे विशेष्यपदं किम्?<br>(क) देशानाम्<br>(ख) राष्ट्राणाम्<br>(ग) देशभक्तानाम्<br>(घ) जनानाम्<br><br>**प्रश्न 3.**<br>'**अनया**' इत्यस्य सर्वनामपदस्य स्थाने संज्ञापदं किमस्ति?<br>(क) एकतया<br>(ख) सहयोगेन<br>(ग) लोकेन<br>(घ) संहत्यया<br><br>**प्रश्न 4.**<br>'**स्वतन्त्रता**' इत्यस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?<br>(क) आधीनता<br>(ख) स्वाधीनता<br>(ग) परतन्त्रता<br>(घ) पराधीनम् | | **एकतायाः महत्त्वम्**<br><br>**(ख) एकता**<br><br>**(घ) जनानाम्**<br><br>**(क) एकतया**<br><br>**(ग) परतन्त्रता** | |

**10. गृहकार्यम् -**

कमपि गद्यांशं चित्वा तस्मात् प्रश्नानाम् उत्तराणि लिखत।